International Journal of Multidisciplinary Horizon

IssN: **3049-2017**
IJMH 2026; 3(6): 05-08
© 2026 IJMH
www.themultijournal.com

Received: 15-10-2026
Accepted: 31-10-2026
Publish : 02-11-2026

मिहिर दासः
शोधछात्र,साहित्यविभागः,
राष्ट्रिय संस्कृत विश्वविद्यालयः,तिरुपतिः

Correspondence:
मिहिर दासः
शोधछात्र,साहित्यविभागः,
राष्ट्रिय संस्कृत विश्वविद्यालयः,तिरुपतिः

बौद्धचरितम् इत्यास्मिन् महाकाव्ये प्राकृतिकपर्यावरणीयतत्त्वानां विचारः

मिहिर दासः

भूमिका-

धर्मं दर्शनञ्चाश्रित्य अनेकसाहित्यस्योद्भवं विकाशञ्च जायते। यथा सनातनधर्मं दर्शनञ्चाश्रित्य वैदिकसाहित्यं,जैनधर्मं दर्शनञ्चाश्रित्य जैनसाहित्यं, तथैव बौद्धधर्मं दर्शनञ्चाश्रित्य बौद्धसाहित्यस्योद्भवं विकाशमजायतः। विदितमस्ति यत् जैनाचार्याः कवयश्च संस्कृतसाहित्यस्य विकाशे महत्वपूर्णं योगदानं प्रदत्ताः। एवञ्च बौद्धाचार्याः कवयरपि संस्कृतसाहित्यं प्रणित्य संस्कृतवाङ्मयं विवर्धितवन्तः।

प्रारम्भे तु जैनबोद्धपरम्परयां ग्रन्थानां रचना प्राकृतपालिभाषायां प्रारब्धारासीत्। परन्तु कालान्तरेषु संस्कृतभाषया ग्रन्थरचनाः प्रारब्धाः। विशेषतया महायानीयाः संस्कृतं तथा मिश्रसंस्कृतभाषायां ग्रन्थरचना कृतवन्तः। मन्यते यत् संस्कृतविदुषां वैदुष्येन(पण्डित्येन) अभिभूत्य बोद्धाचार्याः काव्यादिरचना प्रारब्धवन्तः। गीर्वाण्या संस्कृतभाषया ग्रन्थस्य प्रणिते सति ग्रन्थप्रणेतुः भगवन्तं तथागतं प्रति अतिशयश्रद्धापि प्रकटिता। अद्यपि बौद्धसाहित्ये संस्कृतग्रन्थस्य प्रणयनस्य परम्पराविच्छन्नरूपेण प्रचलिता वर्तते। बौद्धकवयः विशेषतया भगवतः बुद्धस्य जीवनचरितं उपदेशं सिद्धान्तञ्चाश्रित्य ग्रन्थादयः रचितवन्तः। अपि च बोद्धसंस्कृतसाहित्ये बौद्धनृपतिनां, महापरूषाणां, श्रष्ठविभूतिनां चरित्रादर्शादयः वर्णिताः सन्ति। यथा अश्वघोषस्य बुद्धचरितम्, सौन्दरनंदम् महाकाव्यम्, अचार्यबुद्धघोषस्य सिद्धार्थचरितम् महाकाव्यम्, आर्यशूरिणः जातकमाला, आचार्यशान्तिभिक्षु शास्त्रिणः बुद्धविजयम्, बुद्धोदयम्, अशोकाभ्युदकाव्यम्, सत्यव्रतशास्त्रिणः बोधिसत्वचरितमादिमहाकाव्यानि काव्यानि च अतिप्रसिद्धानि सन्ति।

उपरिक्तेषु काव्येषु संस्कृतसाहित्यजगति तथा बौद्धसाहित्यजगत्यतिप्रसिद्धमहाकविना अश्वघोषण विरचितं " बौद्धचरितम् इत्यास्मिन् महाकाव्ये प्राकृतिकपर्यावरणीयतत्त्वानां विचारः" इति विषयम् अधिकृतत्य शोधपत्रं प्रस्तूयते।

महाकवि अश्वघोषः- संस्कृतबौद्धसाहित्यजगति महाकवि अश्वघोषस्य नाम नक्षत्रवत् प्रतिभाति। महाकवि अश्वघोषः प्रकाण्डबौद्ध दार्शनिक तथा साहित्यकासीत्। उच्यते यत्- कुषाण सम्राट् कनिष्केण अश्वघोषस्य संरक्षकत्वे एकबौद्धसंगत्याः अयोजिता यत्र बौद्धधर्मस्य प्रचारप्रसारादिविषये दीर्घाचर्चा जाता। तीब्बती चीनी परम्परानुसारं ज्ञायते यत्- सः अयोध्यायाः निवासी आसीत् तस्य मातुः नाम सुवर्णाक्षी। तस्य पूर्वजाः ब्राह्मणः आसन् ते पुष्यमित्रस्य शासनकाले काश्यां आगतवन्तः। श्रुयते यत्- कुशला संगीतज्ञा प्रभा नान्मी तस्य एका प्रेमिका आसीत्। तस्य कालविषये विदुषां मध्ये मतनैक्यम वर्तते। यतः स कुषाणसम्राट कनिष्कस्य सभापण्डितासीत् कनिष्केण 78 ईसाब्दे शकाब्दः प्रारब्धवान्। अतः तस्य समयः प्रथमशताब्दी उच्यते।

अश्वघोषस्य साहित्यिकग्रन्थाः-

बुद्धचरितम् - बुद्धस्य जीवनचरितमाश्रित्य रचितमिदम् संस्कृतबौद्धसाहित्यस्य श्रष्ठग्रन्थरूपेण विवेचितम्। चीनदेशीयप्रशिद्धपर्यटकः इत्सिंग महोदयस्य समयप्रर्यन्तं सम्पूर्णं अष्टादशसर्गात्मकं महाकाव्यम् इदमुपलब्धममासीत्। परन्तु अधुना महामहोपाध्यायहरप्रसाद शास्त्रीणा हस्तलिखितं पाण्डुलिपिम् आधारीकृत्य प्रकाशितसंस्कारे केवलं चतुदर्श सर्गाः प्राप्यन्ते।

सौन्दारनन्दम्- बुद्धकालीनभारतीसमस्कृतिं तथा च बुद्धस्य दार्शनिकतत्त्वं काव्यरूपेण प्रस्तुतं सौन्दरनन्दम् महाकाव्यं अश्वधोषस्य द्वितीयप्रसिद्धकाव्यमस्ति। अस्मिन् ग्रन्थे अष्टादशसर्गाः सम्पूर्ण संस्कृत- भाषायामुपलभ्यते।

अस्वधोषस्य गीतिकाव्यम्- गण्डीस्तोत्रगाथा। अस्मिन् ग्रन्थे अश्वघोषस्य संगीतशक्तेः परिचयं प्राप्यते। ग्रन्थेस्मिन् बौद्धमठमन्दिरेषु गोतमबुद्धस्य स्तुतिपरकानि स्रगधाराछन्दे उनत्रिंशत्गीतानि विद्यन्ते।

दार्शनिक काव्यानि- महाजन श्रद्धोत्पादशास्त्रम् , सूत्रालंकारः , वज्रसूचिः,

दृश्यकाव्यानि- शारिपुत्रप्रकरण, उर्वशी वियोगः,राष्ट्रपालः

विषयः –

'प्र' उपसगंपूर्वकात् 'कृ' धातोः क्तिन् प्रत्यये कृते सति 'प्रकृति' शब्दः सिद्धयति यस्याभिप्रायोऽस्ति प्रकृष्टा उत्कृष्टा, कृतिः सृष्टिः। प्रकृतिः सर्जनात्मक विश्वस्याभिव्यक्तिरस्ति। प्र-कृ धातौ इक् प्रत्ययेन प्राकृतिकः इति पदं सिद्धम्। अर्थात् अस्यां प्रकृत्यां ये प्रत्यक्ष-परोक्षरूपेण पृथ्वी-सूर्य-वायु-आकाश-जल-अग्नि-वनस्पति-मृत्तिका-पक्षीमनुष्यादयः सन्ति, तेषामधिकृत्य प्राकृतिकप्रर्यावरणम् निर्मितम्। परि-आ-वृ-धातौ ल्युट् प्रत्ययेन 'पर्यावरणम्' शब्दस्य निष्पत्तिः। परि-शब्दस्यार्थः परितः चतुर्दिशम् वा। आ-वृ-धातोः अर्थोऽस्ति आवरणमिति। अतः अस्य अयमेव अर्थः भवति परितः आवरणं पर्यावरणम् अथवा परितः आवृणोतीति पर्यावरणम्। अस्मिन् प्राकृतिकपर्यावरणे सजीव-निर्जीवतत्त्वानां यत् आवरणं विद्यते, तत् प्राकतिकप्रर्यावरणमित्युच्यत्। प्राकृतिकपर्यावरणे सर्वेषां तत्त्वानां मध्ये सदैव सामञ्जस्यं भवेयुः। संस्कृतवाङ्मये पर्यावरणस्य तत्त्वानां सामञ्जस्यसमतादि विषये सदा सकारात्मकं चिन्तनं परिदृश्यते।

यथा-

ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथ्वी शान्तिरापः शान्तिरौषधयः शान्तिः। वनस्पतयः शान्तिः विश्वेदेवाः शान्तिः ब्रह्मः शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधिः।

ॐ शान्तिः शान्तिः शान्तिः।[1]

अर्थात् अस्माकं प्राचीन ऋषयः द्यौलोक-अन्तरिक्ष-पृथ्वी-आप-औषध-वनस्पति-सूर्य-चन्द्रग्रहादयः जगतः सर्वेषां शान्तिं शुद्धताञ्च प्रार्थयन्ति। ते जानन्ति स्म एते प्राकृतिकपर्यावरणीयाः संघटकाः सन्ति, यावत् एतेषां तत्त्वानामस्तित्वं सन्ति तावत् मनुष्याणां तथा सर्वेषां जीवानामस्तित्वं भविष्यन्ति। अथर्ववेदे उक्तं यत –

माता भूमिः पुत्रोऽहं पृथिव्याः।
पर्जन्य पिता स उन पिपर्तु।।[2]

पृथ्वी माता द्यौष्पिता।[3]

पृथिवी अस्माकं पालितारूपेण माता तथा च पर्जन्य अस्माकं रक्षकरूपेण पिता भवति। मनुष्याः प्रकृतेः अङ्के एव जायन्ते म्रियन्ते च इत्येव संसारस्य नियमः। अर्थात् प्राकृतिकपर्यावरणस्य क्षिति-अप-तेज-वायु-आकाशदयः मुख्यपञ्चतत्त्वानि सन्ति। एतैः मनुष्याणां शरीरं निर्मीयते अपि च एतेषु एव संमिल्यते। मनुष्याणां जन्मतः मृत्युः पर्यन्तं सम्पूर्णा क्रिया प्रकृत्या सहायेन सम्पन्ना भवति। भोजन-वस्त्र-जल-वायु-विलासादिसाधनानि प्रकृत्या सहायेन लभ्यन्ते। मानवसभ्यतायाः उत्कर्षणं विनाशं च अपि प्रकृत्यामेव सम्भवति। यथा सिन्धुसभ्यतायाः विनाशे वनस्पति-वृक्षादिनां तथा अन्य प्राकृतिकसम्पदानां दोहनस्य फलस्वरूपं प्रकृतिकोपः एव मुख्यकारणमासीत्। तथैव मिशरीयसभ्यतायाः विकाशमुकर्षञ्च नीलनद्याः तटे स्थितौ अनुकूलप्राकृतिकपर्यावरणे बभूव। तदर्थम् अस्माकम् ऋषयः प्रकृतिं कामपि क्षतिं विना तस्याः समृद्धौ स्वस्य जीवनं समर्पयामासः। ते प्रकृतेः प्राङ्गणैव स्वेषां कुटिरं निर्माय पशुपक्षी-पादपादीनां मध्ये स्थातुम् आरब्धमासः। स्वस्थजीवनार्थं पर्वतस्य समीपे तथा च नदीनां सङ्गमस्थले निवासर्थं स्थानमचिन्वन। प्रकृतिः पञ्चमहाभूतेषु मनुष्याणां त्रिविधतपार्थं (दैविक, दैहिक, भौतिकश्चेति) वनस्पति-औषध-धातवरत्नानि-वनानि-उपवनानि-पर्वत-निर्झर-ह्रद- सरोवर- नद्यादीनां व्यवस्थाः कृता। एवञ्च प्रकृत्या सह मनुष्याणां सम्बन्धमनादिकालात् अनन्यरूपेण विद्यते। मनुष्याः प्रकृतेः सान्निध्यात् यत्किमपि सुखादिकमनुभूयन्ते तत्तु तेषां भाव-विचार्येषु प्रकाश्यते। अतः क्रान्तादर्शयः कवयः प्रकृतेः मानवीयकरणार्थं प्रयतत्नं कुर्बन्ति स्वीयकाव्यलेखनेन। अस्मिन् सन्दर्भे महाकवि तस्यबुद्धचरितं महाकाव्ये प्राकृतिकपर्यावरणस्य मानवात् अतिसंवेदनशीलं रूपं वर्णयन् प्राकृतिक पर्यारणस्य संरक्षणं संवर्धनं प्रति च प्रति मानवान् सचेतनं कृतवान्।

अस्मिन् काव्ये विविधपात्राणां सुख-दुःख-प्रसन्नता-क्रोध-भयादीनां प्रकाशे प्रकृतिः सदैव मनुष्यैः सह दृष्टिगोचरा भवति। अपि च प्राकृतिकस्थलस्य वर्णनं, प्राकृतिकसौन्दर्यस्य वर्णनम्, ऋतुणां वर्णनम्, लतावृक्षादीनां वर्णनं वहुत्र अस्मिन् काव्ये परिदृश्यन्ते। वौद्धसाहित्येषु बुद्धचरितं महाकाव्ये प्रकृतेः सान्निध्यं सर्वेभ्यः सुखैश्वर्येभ्यः उत्कृष्टत्वेन प्रतिपादितम्। प्रकृतेः सान्निध्यस्य इयमुत्कृष्टता ज्ञात्वेव भगवतः बुद्धस्य जन्मनः प्राक् महाराज्ञ्याः मायादेव्याः लुम्बिनीत्यस्मिन् वने निवासार्थमभिप्रायम् व्यक्तं करोति तथा च सा तत्र गत्वा स्वच्छप्राकृतिकपर्यावरणैव भगवतः बुद्धस्य प्रसवं कारितवती इति वर्णनमाध्यमेन ज्ञायते।

सा लुम्बनीनाम्नी वने मनोज्ञे ध्यानप्रदे देववनादनूने।
वासेच्छया प्राहप्रतिं प्रतीता सत्त्वनिभं दोहदमामनन्ति।।[4]

अपि च सर्वार्थसिद्धः बुद्धः प्राकृतिकपर्यावरणे वनोपवनादिषु परिभ्रमणसमये एव जीवनस्य सत्यता ज्ञानार्थमुत्सुक्यं भवति स्म। तथा प्रकृतेः सान्निध्ये एव अभिष्टार्थस्य सिद्धिः प्राप्तवान्अर्थात् वोधिः लब्धवान्।

महाकवि अश्वघोषः अस्मिन् महाकाव्ये प्रसङ्गानुकूलं – पृथिवी,पर्वत,नद्यः, सरोवरः, वन-उपवनानि, ऋतुवः,मेघम्,वर्षा,पशु-पक्षिणः,सर्पादिप्राकृतिकपर्यावरणीयतत्त्वानां वर्णनं कृतवान्।

भगवतः बुद्धस्य जन्मसमये प्राकृतिकपर्यावरणीयतत्त्वानां परिवर्तनं विशृङ्खजगति शान्तेः प्रतीकरूपेण विवेचितम्। तस्यजन्मकारणात् गिरिराजकीले स्थिता इयं पृथिवी वायुनाघातेन नौ इव कम्पिता तथा मेघरहिताकाशात् चन्दनेन सुगन्धियुक्ता रक्तनीलकमलमीश्रिता वृष्टिः वभूव।

यस्य प्रसूतौ गिरिराजकीला वाताहता नौरिव भूश्चचाल।
स चन्दना चोत्पलपद्मगर्भा पपात वृष्टिर्गगनादनभ्रात्।।[5]

स्पर्शेण सुखदायकः मनोमुग्धकरः वायुः स्वाच्छपरिश्रतोत्तमवस्त्रस्य वर्षारूपेण प्रवाहितः। तत्र सूर्यः अत्याधिकं जाज्वल्यमानं भूत्वा सौम्यसिखया सह ज्वलितः।

वाता ववुः स्पर्शसुखा मनोज्ञा दिव्यानि वासांस्यवपातयन्तः।
सुर्यः स एवाभ्यधिकं चकाशे जज्वाल सौम्यर्चिरनीरितोऽग्निः।।[6]

राजाशुद्धोदनस्य निवासभूमेः उत्तरदिशि स्वयमेव उज्ज्वलस्वच्छ-जलयुक्तः कूपः निर्मितः। यं पवित्ररूपेण स्वीकृत्य अन्तःपुरे स्थिताः स्त्रियः विस्मयेन सर्वाक्रिया कृताः। शिशुसिद्धार्थं दर्शनार्थमागातैः धर्माभिलाषैः महापुरूषैः वर्षितपुष्पैः असमये लुम्विनीवने पुष्पवृष्टिः जाता। सिद्धार्थस्य जन्मकारणात् तस्मिन् वने प्राकृतिकपर्यावरणस्य अलोकिकपरिवर्तनं परिदृष्टमासीत्। तत्र हिंस्राः प्राणिनः हिंसां त्यक्त्वा स्वजनं परं वा कामपि न पीडन्ति स्म। संसारे सर्वे व्यधयः रूजाश्च विना प्रयत्नेन दूरीभूताः। मृगपक्षिणश्च मधुरस्वरेण कूजिताः, नद्यः शान्तरूपेण प्रवाहिताः, दिशाः स्वच्छनिर्मलाः जाताः, मेघरहितस्वच्छाकशः निनादितः।

भूतैरसौम्यैः परित्यक्तहिंसैर्नाकारि पीडा स्वगणे परे वा।
लोके हि सर्वाश्च विना प्रयासं रूजो नराणां शमयां बभूवुः।।
कलं प्रणेदुः मृगुक्षिणश्च शान्ताम्बुवाहाः सरितो बभूवुः।
दिशः प्रसेदुर्विमले निरभ्रे विहासे दुन्दुभयो निनेदुः।।[7]

प्राकृतिकपर्यावरणीयाङ्गत्वेन पर्वतीयपर्यावरणविषये उच्यते यत्- अत्योन्नतेषु पर्वतेषु विद्यमानानि वनोपवनानि वृष्टेः सहायकानि

भवन्ति। पर्वतेषु विद्यमानाः नद्यः, निर्झरादयः शान्तिप्रदायकाः भवन्ति। अत्र सदा शुद्धवायुः, पानार्थं परिश्रूतजलं, भोजनार्थं स्वादिष्टं फलमोपलभ्यते। रोगनिरामयार्थमधिकांशौषधयः पर्वतीय-वनप्रदेशादेव प्राप्यन्ते। अस्य वातावरणं सर्वविधबन्धनात् मुक्तमनसं एकाग्रताप्रदायकं भवति। अस्मादीया मुनयः ऋषयश्च अस्मिन् विषये सम्यकतया अवगतासन् यस्मात् कारणात् ते आध्यात्मि-कसिद्धार्थं पर्वतीयवातावरणे तप-ध्यानादिकं कार्यं कुर्वन्ति स्म। गौतम बुद्धोऽपि चरमसत्यस्यान्वेषणार्थं हिमालयपर्वतं गतवान्। तत्र विद्यमान भार्गवीयाश्रमस्य वातावरणं शारीरिकश्रमहारकं तथा मनसि शान्तिदायकमासीत्। तत्र मृगाः पक्षिणश्च स्वास्थ्य स्वच्छन्देन विचरन्ति स्म।

सुप्तविश्वस्तहरिणं स्वस्थ्यस्थिरविहंगम्।
विश्रान्त इव यद् दृष्ट्वा कृतार्थ इव चाभवत्।।[8]

अस्मिन् काव्ये पर्वतस्य वर्णनमधिकतया न प्राप्यते। परन्तु पर्वतस्य नामानि वहुत्र उपलभ्यन्ते। यथा-हिमालयपर्वतः, पाण्डवपर्वतः, कैलाशपर्वतः, गयशीर्षपर्वतः, गृध्रकूट-पाषाण-मन्दराचल-विदेह-विन्ध्यादयः पर्वताः प्रमुखाः सन्ति।

एतेषु पर्वतेषु **हिमालयपर्वतस्य विषये उच्यते यत्-** सदा हिम्नाच्छादितात् अस्य नाम हिमालयः जातः। आध्यात्मिकदृष्ट्या अस्याधिकं महत्वं विद्यते।

ब्रह्मर्षिराजर्षिसुरर्षिजुष्टः पुण्यः समीपे हिमवान् हि शैलः।
तपांसि तान्येव तपोधनानां यत्संनिकर्षाद् बहुलीभवन्ति।।[9]

अर्थात्- अत्र ब्रह्मर्षिराजर्षिसुरर्षिभिः सेवितः पवित्रहिमालयपर्व-तस्य सान्निध्यात् तपोधनानां तपांसि तेजस्वीन्या वहुत्र विस्तीर्यन्ते। महाकविना **कैलाशपर्वतस्य** विषये उक्तं यत्-अत्योन्नतविचि-त्रवर्णयुक्तः कैलाशपर्वतः सदा हिम्नावृतात् श्वेतः दृश्यते।

कैलाशो गिरिरिव नैकचित्रासानुः।[10]

पाण्डुपर्वतः-

राजगृहं निकषा पञ्चपर्वतानां विस्तृतसमूहपाण्डुपर्वतः नाम्ना ख्यातः। अत्र लोध्रवृक्षाः प्राप्यमासीत् यत्र मयूराः नादन्ति स्म।

गयशीर्षपर्वतः- अत्र तथागतेन काश्यपस्य चित्तभ्रमं दूरीकृत्य तस्य भ्रातारौ गयाकाश्यपं तथा नदीकाश्यपं धम्मदीक्षां प्रदत्तम्। तेभ्यां सह उरूविल्वकाश्यपस्य पञ्चाशत्शिश्यानपि धम्मदीक्षया दीक्षि-तम्।[11]

मन्दारचलपर्वतः- महाकविना मन्दराचलपर्वतस्य शिखरं सूर्यस्य शोभावत् वर्णितम्।

सूमेरूपर्वतः- पर्वतोयं अतिगौरवशीलः धैर्यशीलः भवति। अयं पर्वतराजः नान्माऽपि ज्ञायते। अस्मिन् पर्वते प्रातः सूर्यः अतिशोभमानः दृश्यते।[12]

- महाकविः अश्वघोषः अस्मिन् काव्ये यथावसारं नदीनां महत्वं सौन्दर्यञ्च वर्णितवान्, यत् प्राकृतिकपर्यावरणीयदृष्ट्या महोत्यो-पयोगाय कल्पते। अस्समिन् काव्ये वरूणा-असी,गङ्गा, इरावती, नैरञ्जना, मन्दाकिनी, महानदी, हिण्यवती,चेताषां नदीनां वर्णनं कृतम्।

वरूणा-असीः- उभौ क्षेत्रीयौ नद्यौ आस्तः। एतौ नद्यौ गङ्गानद्यां संमिलतौ। एतयोः नद्योः नाममधिकृत्य तटवर्तीक्षेत्रस्य नाम वाराणसी नगरी जाता।

ततो ज्ञानखनिं काशीमपश्यज्ज्ञानवान् मुनिः।
वरूणासि सखीश्यां सा संगता यत्र जाह्नवी।।[13]

गङ्गानदी- अश्वघोषेण इयं नदी समुद्रस्य प्रधानपत्नीरूपेण वर्णिता।

गङ्गाया अब्धिभार्यायाः कूलं मुनिरगात् पुनः। [14]

इयं नदी कपिलावस्तुः तथा राजगृहः इत्यानयोः मध्ये प्रवाहित्य तटवर्तीयक्षेत्रे सघनं हरितपर्यावरणं निर्मितवती। अस्या नद्याः तटस्थिते पाटलीपुत्रनगर्यां भगवता गौतमबुद्धेन योगवलेन गङ्गा-नदीं पारं कृतम्। तदारभ्य तटोयं गौतमतीर्थः नान्माख्यायते।

इरावती नदी- इयं नदी पावापूरी तथा कुशी नगर्ययोः मध्ये प्रवाहिता। अधुनेयं नदी उत्तरप्रदेशे राप्तिः नाम्ना प्रवहति।

नैरञ्जानदी- इयं नदी गयां निकषा प्रवाहिता। अस्याः शान्तशुद्धतटीयक्षेत्रैव सिद्धार्थःअश्वथवृक्षस्याधः ध्यानं कृत्वा बोधित्वं प्राप्तवान्। अनेन स्वतः अस्या नद्याः महत्वमनुमीयते।[15]

हिरण्यवती नदी- अद्य इयं नदी हिरन्ना नान्मा ज्ञायते। अश्वघोषस्य समये इयं नदी शालवनं तथा मुकूटबधनमित्ययोः चैत्ययो मध्ये प्रवाहिता। अधुना क्षेत्रमिदं नेपालदेशे विद्यते। अस्याः नद्याः जलं सुवर्णात् अस्याः नाम हिरण्यवती जाता। अस्या तटे शालवनमासीत्। इयं नदी विहारप्रदेशे प्रवाहिता गण्डकः नाम्नि नद्यां मिलिता।

वनोपवनानि-

वनोपवनानि प्रति श्रद्धा वैदिककालादेव अस्मादीये भारतीयसमाजे परिलक्ष्यते। अश्वघोषेण अस्मिन् काव्ये वनेषु वृक्ष-पुष्प-फलादिनां समृद्धता प्राकृतिकपर्यावरणस्य स्वच्छता निर्मलता तथा मानव-मात्रेण सुखसमृद्धे प्रतीकरूपेण वर्णितम्। अस्मिन् काव्ये पर्यावर-णीयाङ्गत्वेन लुम्विनी, जेतवनं, पद्मषण्डः, मृगदायः, आम्रपाली, जीविकाम्रः, अटवी, वेनु, शेतविक, शाल, नन्दन, चैत्रवन-उपनादिनां प्राकृतिकसौन्दर्याः वर्णनं कृतम्।

लुम्विनीवनम्- इदं वनं कपिलावस्तुः तथा देवदहः गणराज्ययोः मध्ये स्तितमासीत्। अधुना नेपालदेशे स्तितम्। विविधवृक्षैः समन्वितं सुन्दरशोभायुक्तवनेऽस्मिन् शिशोः सिद्धार्थस्य जन्मः वभूवः। अत्रवायुः चन्दनवृक्षस्य सुरोभिना सुग्धितः, तथा रक्त-नीलवर्णयुक्त-कमलपुष्पस्य संस्पर्शेण रोमाञ्चितासीत्। अस्मिन् वने पशुपक्षिणः स्वाच्छन्देन विचरन्ति स्म। पक्षीणां मधुरध्वनयः मखरितासन्। अस्य वनस्य प्राकृतिक पर्यावरणं सर्वप्रकारप्रदूषण-रहितात् सर्वे प्राणिनः स्वास्थ्यनिरोगासन्।

मृगदायवनम्-

वनमिदं वाराणसीं निकषा स्थितम्। अत्र सघनवृहत्वृक्षेषु विद्यमानानां कोकिल-मयूरादीनां पक्षीणां सुमधुरध्वनि-प्रतिध्व-निभिः अस्यवनस्य श्रियं वर्धितम्। अत्रेव कौण्डिन्य, महानागः, वप्रः, अश्वजितः भदियश्च नान्मि पञ्चभिक्षुवः तथागतेन प्रथमधम्म-ज्ञानेनोपदिष्टाः।[16]

आम्रपालीवनम्-

वैशालीं निकषा इदमुवनमासीत्। यत्र आम्रपाली नान्मी गणिकायाः स्वामित्वमासीत्। तस्या नामानुसारमेव अस्य नाम आम्रपाली वनं जातम्। अत्रेव सा तथागतं दर्शनं कृत्वा बौद्धधर्मं गृहीतवती तथा च स्वस्याः वनमिदं भिक्षुसंघस्य कृते दत्तवती।[17]

जिवीविकाम्रवनम्-

राजगृहे स्थितं वनमिदं जीवकस्य नामानुसारमेव प्रसिद्धमासीत्। अत्रोपि सघनाम्र-वृक्षाणामुद्यानमासीत्।

अटवीवनम्-

बिन्ध्यपर्वतस्य समीपं विस्तृतं वनमासीत् यत्र आटवकः नाम एकः यक्षः निवसनासीत्। यः तथागतेन बौद्धधर्मेण दीक्षितः। यक्षस्य नामानुसारं अस्य वनस्य नाम अटवी वनं जातम्।[18]

वेणुवनम्-

मगधप्रदेशस्य राजधानी राजगृहस्य समीपं विस्तृतपर्वतीय क्षेत्रे वनमिदं स्थितमासीत्। इदं वनं वेणुकण्टकः नान्मापि ज्ञायते। अत्र राजा बिम्बसारः विशिष्टमन्त्रिभिः श्रष्ठनागरिकैः सह धम्मस्योपदेशं गृहीतवान्। तथा च वनमिदं तथागताय दानरूपेण दत्तम्।[19]

ऋतुवः -

पर्यावरणीयाङ्गत्वेन ऋतुणां महत्वपूर्णा भूमिका वर्तते। कस्यापि वीजस्याङकुरार्थं मृत्तिका, जलं, वीजानां समन्वयेन सहानुकूल-कालस्य वा ऋतोः उपस्थितिरत्यावश्यकी। यद् अन्नमस्माकं शरीरे पुष्टिं सञ्चयति तद् अन्नं मृत्तिकाजलाभ्यां सह ऋतोः समुचितसंयोगेन उत्पाद्यते।

बुद्धचरिते उल्लेखितं यत्- मायादेव्याः गर्भे शिशोः सिद्धार्थस्या-गमनादेव शुद्धोदनस्य शक्यराज्ये पञ्चमहाभूतानां निर्विकारेण स्थितात् सर्वे ऋतुवः स्वयमेव यथा समये कल्पवृक्षेव फलं यच्छन्ति स्म। अनेन बुद्धस्य समये पर्यावरणस्य परिशुद्धता अनुमीयते।

अस्मिन् काव्ये अश्वघोषेण शरदऋतोः शोभायाः चित्रं तथा तस्य स्वच्छतां निर्मलताञ्च सरस-सहज-माधुर्य-प्रसादपूर्णभाषया वर्णितम्। शरदऋतोः शुक्लपक्षीयरात्रेः शोभायाः विषये कविना उक्तं यत्- शरदऋतोः शुक्लपक्षस्य प्रतिपादे चन्द्रस्य शोभा प्रसन्नश्वेतकुमुदवद् दृश्यते। अस्मिन् रात्रौ निर्मलगगने नक्षत्रानि शोभन्ते।

कुमुदानामिव शरदच्छुक्लपक्षादिचन्द्रमाः।।[20]

कविना अस्मिन् काव्ये ऋतुणां वर्णनमाध्यमेन मानवमनसः प्रदूषणं विकारञ्च निवारणार्थं सुबोधसर्वग्राह्यज्ञानं प्रस्तूतम्। अस्मिन् काव्ये ऋतुणां निर्विकारितायाः शोभनभावमेव प्रायं निरूपितम्। अतः मानवीयसंवेदनया तथा आत्मीयभावनया सम्पृक्तमस्मिन् काव्ये सर्वे ऋतुणां पर्यावरीयपवित्रताः सर्वेषां प्राणिनां कृते उपकारकं भवन्ति।

सारांशः-

अस्मिन् काव्ये विविधपात्राणां सुख-दुःख-प्रसन्नता-क्रोध-भयादीनां प्रकाशे प्रकृतिः सदैव मनुष्यैः सह दृष्टिगोचरा भवति। अपि च प्राकृतिकस्थलस्य वर्णनं, प्राकृतिकसौन्दर्यस्य वर्णनम्, ऋतुणां वर्णनम्, लतावृक्षादीनां वर्णनं वहुत्र अस्मिन् काव्ये परिदृश्यन्ते। वौद्धसाहित्येषु बुद्धचरितं महाकाव्ये प्रकृतेः सान्निध्यं सर्वेभ्यः वाह्यिकसुखैश्वर्येभ्यः उत्कृष्टत्वेन प्रतिपाद्यते।

भगवतः बुद्धस्य जन्मसमये प्राकृतिकपर्यावरणीयतत्त्वानां परिवर्तनं विशृङ्खजगति शान्तेः प्रतीकरूपेण विवेचितम्। तस्यजन्मकारणात् गिरिराजकीले स्थिता इयं पृथिवी वायुनाघातेन नौ इव कम्पिता तथा मेघरहिताकाशात् चन्दनेन सुगन्धियुक्ता रक्तनीलकमलमीश्रिता वृष्टिः वभूव। येन बुद्धस्य जन्मकाले वायवीयपर्यावरणस्य परिशुद्धता ज्ञायते।

अत्योन्नतेषु पर्वतेषु विद्यमानानि वन-उपवनानि वृष्टेः सहायकानि भवन्ति। पर्वतेषु विद्यमानाः नद्यः, निर्झरादयः पर्यावरणस्य शान्तिप्रदायकाः भवन्ति। अत्र सदा शुद्धवायुः, पानार्थं परिश्रूतजलं, भोजनार्थं स्वादिष्टं फलमोपलभ्यते। अनेन अस्मिन् समये पर्वतस्य महत्वं प्रतीयते।

अश्वघोषेणास्मिन् काव्ये वनेषु वृक्ष-पुष्प-फलादिनां समृद्धता प्राकृतिकपर्यावरणस्य स्वच्छता निर्मलता तथा मानवमात्रेण सुखसमृद्धे प्रतीकरूपेण वर्णितम्।

बुद्धचरिते उल्लेखितं यत्- मायादेव्याः गर्भे शिशोः सिद्धार्थस्या-गमनादेव शुद्धोदनस्य शक्यराज्ये पञ्चमहाभूतानां निर्विकारेण स्थितात् सर्वे ऋतुवः स्वयमेव यथा समये कल्पवृक्षेव फलं यच्छन्ति स्म। अनेन बुद्धस्य समये पर्यावरणस्य परिशुद्धता अनुमीयते। कविना अस्मिन् काव्ये ऋतुणां वर्णनमाध्यमेन मानवमनसः प्रदूषणं विकारञ्च निवारणार्थं सुबोधसग्राह्यज्ञानं प्रस्तूतम्। अस्मिन् काव्ये ऋतुणां निर्विकारितायाः शोभनभावमेव प्रायं निरूपितम्।

वस्तुतः अस्मिन् काव्ये महाकविना पर्यावरणस्य प्रदूषणस्य मुख्यकारणत्वेन अस्माकम् ऐश्वर्यभोगस्य उच्चाभिलाषमेव स्वीकृतम्।

सुखार्थमशुभं कृत्वा य एते भृशदुःखिताः।
आस्वादः स किमेतेषां करोति सुखमण्वपि।।[21]

ऐश्वर्यभोगार्थमेव मानवाः वृक्षछेदनम्, आधुनिकयान-वाहनादिनां तथा अतिसुखार्थं तापानुकूलं- शीतलीकरणयनत्रादिनामधिकव्यवहा-रेण प्राकृतिकपर्यावरणीयतत्त्वानां हानिं विधाय विविधदुःखम् अनुभवन्ति। अतः वहुजनसुखाय वहुजनहिताय इति विचिन्त्य मनसः निर्मलता तथा सात्त्विकगुणैः विकासितनैतिकाव्यवहारः पर्यावरणस्य संरक्षणे महत्युपकाराय कल्पते।

सन्दर्भग्रन्थाः –

1. बुद्धचरितम्-महन्त श्री रामचन्द्रदास शास्त्री(चौखम्वा विद्या-भवन)
2. बुद्धचरितम्- सूर्यनारायण चौधरी कृत टीका
3. अश्वघोषकालीन भारत- डॉ. अग्रेलाल
5. बौद्ध संस्कृत साहित्य का इतिहास- प्रो.भागचन्द्र जैन भास्कर
6. संस्कृत साहित्य में पर्यावरण एवं कालिदास कि वनस्पपतियाँ - डॉ. मायाराम उनियाल

सन्दर्भ

1. शु. ज-.36/17
2. अ.व.पृ.सू-12/10
3. य.वे-2.10-10
4. बु..च.-01/06
5. बुद्धचरितम्-1/21
6. तदेव 1/22
7. तदेव 1/25-26
8. बद्धचरित-6/2
9. बुद्धचरित-7/39
10. तदेव 10/40
11. तदेव-16/35
12. बुद्धचरितृ5/43
13. बुद्धचरित-15/14
14. बद्धचरित-22/05
15. बुद्धचरित-12/90
16. बुद्धचरितम्-15/90
17. तदेव-22/51
18. तदेव 21/18
19. तदेव 16/42-52
20. तदेव 12/98
21. बुद्धचरितम्-14/18